श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षष्ठं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षष्ठं दशकम् ॥

## विराड्देहस्य जगदात्मत्ववर्णनम्

एवं चतुर्दशजगन्मयतां गतस्य
पातालमीश तव पादतलं वदन्ति।
पादोर्ध्वदेशमपि देव रसातलं ते
गुल्फद्वयं खलु महातलमद्भुतात्मन् ॥ 6.1 ॥

जङ्घे तलातलमथो सुतलं च जानू
किञ्चोरुभागयुगलं वितलातले द्वे।
क्षोणीतलं जघनमम्बरमङ्ग नाभि -
र्वक्षश्च शक्रनिलयस्तव चक्रपाणे ॥ 6.2 ॥

ग्रीवा महस्तव मुखं च जनस्तपस्तु
फालं शिरस्तव समस्तमयस्य सत्यम्।
एवं जगन्मयतनो जगदाश्रितैर -
प्यन्यैर्निबद्धवपुषे भगवन् नमस्ते ॥ 6.3 ॥

त्वद्ब्रह्मरन्ध्रपदमीश्वर विश्वकन्द
छन्दांसि केशव घनास्तव केशपाशाः।
उल्लासि चिल्लियुगलं द्रुहिणस्य गेहं
पक्ष्माणि रात्रिदिवसौ सविता च नेत्रे ॥ 6.4 ॥

निश्शेषविश्वरचना च कटाक्षमोक्षः
कर्णौ दिशोऽश्वियुगलं तव नासिके द्वे।

लोभत्रपे च भगवन्नधरोत्तरोष्ठौ
    तारागणाश्च दशनाः शमनश्च दंष्ट्रा ॥ **6.5** ॥

माया विलासहसितं श्वसितं समीरो
    जिह्वा जलं वचनमीश शकुन्तपङ्क्तिः।
सिद्धादयस्स्वरगणा मुखरन्ध्रमग्नि -
    र्देवा भुजाः स्तनयुगं तव धर्मदेवः ॥ **6.6** ॥

पृष्ठं त्वधर्म इह देव मनस्सुधांशु -
    रव्यक्तमेव हृदयाम्बुजमम्बुजाक्ष।
कुक्षिस्समुद्रनिवहा वसनं तु सन्ध्ये
    शेफः प्रजापतिरसौ वृषणौ च मित्रः ॥ **6.7** ॥

श्रोणीस्थलं मृगगणाः पदयोर्नखास्ते
    हस्त्युष्ट्रसैन्धवमुखा गमनं तु कालः।
विप्रादिवर्णभवनं वदनाब्जबाहु -
    चारूरुयुग्मचरणं करुणाम्बुधे ते ॥ **6.8** ॥

संसारचक्रमयि चक्रधर क्रियास्ते
    वीर्यं महासुरगणोऽस्थिकुलानि शैलाः।
नाड्यस्सरित्समुदयस्तरवश्च रोम
    जीयादिदं वपुरनिर्वचनीयमीश ॥ **6.9** ॥

ईदृग्जगन्मयवपुस्तव कर्मभाजां
    कर्मावसानसमये स्मरणीयमाहुः।
तस्यान्तरात्मवपुषे विमलात्मने ते
    वातालयाधिप नमोऽस्तु निरुन्धि रोगान् ॥ **6.10** ॥

॥ इति श्रीमन्नारायणीये षष्ठं दशकं समाप्तम् ॥